श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ त्र्यशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्र्यशीतितमः सर्गः ॥

## भरतस्य सम्मत्या श्रीरामस्य राजसूययज्ञकरणविषयकविचारतो विनिवृत्तिः

तच्छ्रुत्वा भाषितं तस्य रामस्याक्लिष्टकर्मणः।
द्वाःस्थः कुमारावाहूय राघवाय न्यवेदयत्॥ **7.83.1** ॥

दृष्ट्वा तु राघवः प्राप्तावुभौ भरतलक्ष्मणौ।
परिष्वज्य ततो रामो वाक्यमेतदुवाच ह॥ **7.83.2** ॥

कृतं मया यथा तथ्यं द्विजकार्यमनुत्तमम्।
धर्मसेतुमथो भूयः कर्तुमिच्छामि राघवौ॥ **7.83.3** ॥

अक्षयश्चाव्ययश्चैव धर्मसेतुर्मतो मम।
धर्मप्रवचनं चैव सर्वपापप्रणाशनम्॥ **7.83.4** ॥

युवाभ्यामात्मभूताभ्यां राजसूयमनुत्तमम्।
सहितो यष्टुमिच्छामि तत्र धर्मस्तु शाश्वतः॥ **7.83.5** ॥

इष्ट्वा तु राजसूयेन मित्रः शत्रुनिबर्हणः।
सुहुतेन सुयज्ञेन वरुणत्वमुपागमत्॥ **7.83.6** ॥

सोमश्च राजसूयेन इष्ट्वा धर्मेण धर्मवित्।
प्राप्तश्च सर्वलोकेषु कीर्तिं स्थानं च शाश्वतम्॥ **7.83.7** ॥

अस्मिन्नहनि यच्छ्रेयश्चिन्त्यतां तन्मया सह।
हितं चायतियुक्तं च प्रयतौ वक्तुमर्हथः॥ **7.83.8** ॥

श्रुत्वा तु राघवस्यैतद् वाक्यं वाक्यविशारदः।
भरतः प्राञ्जलिर्भूत्वा वाक्यमेतदुवाच ह॥ **7.83.9** ॥

त्वयि धर्मः परः साधो त्वयि सर्वा वसुन्धरा।
प्रतिष्ठिता महाबाहो यशश्चामितविक्रम॥ **7.83.10** ॥

महीपालाश्च सर्वे त्वां प्रजापतिमिवामराः।
निरीक्षन्ते महात्मानं लोकनाथं यथा वयम्॥ **7.83.11** ॥

पुत्राश्च पितृवद् राजन् पश्यन्ति त्वां महाबल।
पृथिव्या गतिभूतोऽसि प्राणिनामपि राघव॥ **7.83.12** ॥

स त्वमेवंविधं यज्ञमाहर्तासि कथं नृप।
पृथिव्यां राजवंशानां विनाशो यत्र दृश्यते॥ **7.83.13** ॥

पृथिव्यां ये च पुरुषा राजन् पौरुषमागताः।
सर्वेषां भविता तत्र सङ्क्षयः सर्वकोपजः॥ **7.83.14** ॥

सर्वं पुरुषशार्दूल गुणैरतुलविक्रम।
पृथिवीं नार्हसे हन्तुं वशे हि तव वर्तते॥ **7.83.15** ॥

भरतस्य तु तद् वाक्यं श्रुत्वामृतमयं यथा।
प्रहर्षमतुलं लेभे रामः सत्यपराक्रमः॥ **7.83.16** ॥

उवाच च शुभं वाक्यं कैकेय्यानन्दवर्धनम्।
प्रीतोऽस्मि परितुष्टोऽस्मि तवाद्य वचनेऽनघ॥ **7.83.17** ॥

इदं वचनमक्लीबं त्वया धर्मसमागतम्।
व्याहृतं पुरुषव्याघ्र पृथिव्याः परिपालनम्॥ **7.83.18** ॥

एष्यदस्मदभिप्रायाद् राजसूयात् क्रतूत्तमात्।
निवर्तयामि धर्मज्ञ तव सुव्याहृतेन च॥ **7.83.19**॥

लोकपीडाकरं कर्म न कर्तव्यं विचक्षणैः।
बालानां तु शुभं वाक्यं ग्राह्यं लक्ष्मणपूर्वज।
तस्माच्छृणोमि ते वाक्यं साधु युक्तं महाबल॥ **7.83.20**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्र्यशीतितमः सर्गः॥